दिवादिगणः

दिवादिगणे, कर्त्रर्थे सार्वधातुकप्रत्यये परे धातुभ्यः श्यन् विकरणप्रत्ययः विहितः अस्ति | सर्वप्रथमं **कर्तरि शप्** (३.१.६८) इत्यनेन शप् विहितः, तदा **कर्तरि शप्** इति सूत्रं प्रबाध्य **दिवादिभ्यः श्यन्** (३.१.६९) आगत्य कार्यं करोति | किमर्थम् ? अस्यां दशायां **दिवादिभ्यः श्यन्** स्वस्य कार्यं न करोति चेत् इदं सूत्रं निरवकाशं भविष्यति | **कर्तरि शप्** इत्यस्य अन्यत्रलब्धावकाशः अस्ति | अतः **दिवादिभ्यः श्यन्, कर्तरि शप्** इत्यस्य अपवादभूतसूत्रम् | **पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः** इति परिभाषया यत् सूत्रं अपवादः अस्ति, तत् अपरस्य अपेक्षया बलवत् | अतः अत्र **दिवादिभ्यः श्यन्** इति सूत्रस्य कार्यं सिध्यति |

**दिवादिभ्यः श्यन्** (३.१.६९) = दिवादिगणे स्थितेभ्यः धातुभ्यः श्यन्–प्रत्ययः भवति, कर्त्रर्थक–सार्वधातुकप्रत्यये परे | दिव् आदिर्येषां ते, दिवादयः बहुव्रीहिसमासः, तेभ्यः दिवादिभ्यः | दिवादिभ्यः पञ्चम्यन्तं, श्यन् प्रथमान्तं, द्विपदमिदं सूत्रम् | **कर्तरि शप्** (३.१.६८) इत्यस्मात् **कर्तरि** इत्यस्य अनुवृत्तिः; **सार्वधातुके यक्** (३.१.६७) इत्यस्मात् **सार्वधातुके** इत्यस्य अनुवृत्तिः | **प्रत्ययः** (३.१.१), **परश्च** (३.१.२) इत्यनयोः अधिकारः; **धातोरनेकाचो हलादेः क्रियासमभिहारे यङ्** (३.१.२२) इत्यस्मात् **धातोः** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **दिवादिभ्यः धातुभ्यः श्यन् प्रत्ययः परश्च कर्तरि सार्वधातुके** |

**कर्तरि शप्** (३.१.६८) = धातुतः शप्–प्रत्ययः भवति, कर्त्रर्थक–सार्वधातुकप्रत्यये परे | अनुवृत्ति–सहितसूत्रम्— **धातोः शप् प्रत्ययः परश्च कर्तरि सार्वधातुके** |

अयं श्यन्–प्रत्ययः शित् इति कारणतः **तिङ्शित्सार्वधातुकम्** (३.४.११३) इति सूत्रेण सार्वधातुकप्रत्ययः | तस्मात् कारणात्, श्यन्–प्रत्यये परे, **सार्वधातुकार्धधातुकयोः** (७.३.८४) **पुगन्तलघूपधस्य च** (७.३.८६) इति सूत्राभ्यां गुणकार्यं विहितम् | परन्तु श्यन् अपित्, अतः **सार्वधातुकमपित्** (१.२.४) इति सूत्रेण ङिद्वत् | ङिद्वत् अतः **क्क्ङिति च** (१.१.५) इति कारणतः यत्र यत्र गुण–कार्यं विहितम्, तत्र तत्र निषिद्धम् |

**सार्वधातुकमपित्** (१.२.४) = अपित् सार्वधातुकम् ङित् इव अस्ति | सार्वधातुकम् प्रथमान्तम्, अपित् प्रथमान्तं, द्विपदमिदं सूत्रम् | **गाङ्कुटादिभ्योऽञ्णिन्ङित्** (१.२.१) इत्यस्मात् **ङित्** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितं सूत्रम्— **सार्वधातुकम् अपित् ङित्** |

**क्क्ङिति च** (१.१.५) = यः प्रत्ययः गित्, कित् अथवा ङित् अस्ति, अपि च तस्मात् प्रत्ययात् पूर्वं तस्य एव प्रत्ययस्य कारणतः इकः स्थाने गुणः वा वृद्धिः वा भवति स्म, सः (गुणः वृद्धिः) न भवति | ग् च क् च ङ् च तेषाम् इतरेतरद्वन्द्वः क्क्ङः; क्क्ङः इतः यस्य सः क्क्ङित्, तस्मिन् परे क्क्ङिति | द्वन्द्वगर्भबहुव्रीहिसमासः | अत्र ग्–स्थाने ककारः **खरि च** इत्यनेन चर्त्वसन्धिः | क्क्ङिति सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **इको गुणवृद्धी** (१.१.३) इत्यस्य पूर्णतया अनुवृत्तिः; **न धातुलोप आर्धधातुके** (१.१.४) इत्यस्मात् **न** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितं सूत्रम्— **क्क्ङिति च इकः गुणवृद्धी न** |

प्रश्नः उदेति यत् श्यन्–प्रत्ययस्य आगमनात् प्रागेव किमर्थं न गुणकार्यं भवतु ? यथा दिव्–धातुः + तिप् | तिप् तु सार्वधातुकः अतः अनेन किमर्थं न गुणः ? उत्तरम् अस्ति यत् श्यनः विधानं नित्यम्, तिपः गुणकार्यम् अनित्यम् इति कारणेन गुणकार्यं निषिद्धम् | **पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः** (परिभाषा ३८) | अनेन पूर्वसूत्रस्य अपेक्षया परसूत्रं बलवत् भवति; परसूत्रस्य अपेक्षया नित्यसूत्रं बलवत् भवति; नित्यसूत्रस्य अपेक्षया अन्तरङ्गसूत्रं बलवत् भवति; अन्तरङ्गसूत्रस्य अपेक्षया अपवादसूत्रं बलवत् भवति |

नित्यम् | कृताकृतप्रसङ्गी यः विधिः भवति, सः नित्यः इत्युच्यते | समानकाले समानस्थले द्वयोः सूत्रयोः प्रसक्तिरस्ति इति चिन्तयतु | द्वयोर्मध्ये एकस्य सूत्रस्य प्रवृत्तिः कारिता; तदनन्तरमपि अपरस्य सूत्रस्य पुनः प्राप्तिः अस्ति चेत्, तस्यां दशायां यत् अपरं सूत्रम् अस्ति, तत् नित्यसूत्रम् इत्युच्यते | नित्यं नाम तस्य प्रसक्तिः पूर्वमपि आसीत्, अनन्तरमपि अस्ति | यदा किञ्चन सूत्रं नित्यम् अस्ति, तदा तत् सूत्रं प्रथममेव प्रवर्तनीयम् | नित्यम् इत्यस्मात् कारणात् बलवत् | अतः पूर्वसूत्रं नित्यम् अस्ति चेत् पूर्वसूत्रं सत्यपि पूर्वम् आयाति |

तर्हि आहत्य दिवादिगणे श्यन् विहितः; श्यन् च ङिद्वत् | अस्य एकः परिणामः गुणनिषेधः | परन्तु प्रत्ययस्य ङित् ङिद्वत् च भवनेन केवलं गुणनिषेधः सिद्धः इति न; तस्य अनेके प्रभावाः सन्ति | तेषु त्रयः प्रमुखाः अधोलिखिताः |

यः कोऽपि प्रत्ययः कित् ङित् वा भवति, तं प्रत्ययं निमित्तीकृत्य पूर्वं स्थिते अङ्गे यथासङ्गं त्रीणि विशिष्टकार्याणि प्रवर्तनीयानि—

१) अङ्गान्ते उपधायां च इकः गुणः निषिद्धः | दिवादौ पी + श्यन् + ते → पीयते | पुष् + श्यन् + ति → पुष्यति | **क्क्ङिति च**

(१.१.५) ।
२) अनिदित्–धातूनाम् उपधायां न्–लोपः । येषां धातूनाम् इत्–संज्ञकः इत् (ह्रस्वः इकारः) नास्ति, तेषां धातूनाम् उपधायां नकारः अस्ति चेत्, तस्य लोपो भवति । भ्रंश् + श्यन् + ति → भ्रश्यति । भ्रंश् + श्यन् + शतृ → भ्रश्यत् । **अनिदितां हल उपधाया क्ङिति** (६.४.२४) ।
३) सम्प्रसारणिनां धातूनाम् सम्प्रसारणम् । यण्–स्थाने इक्–आदेशः (यण्–सन्धौ यथा भवति, तस्य विपरीतक्रमः), किति ङिति प्रत्यये परे । व्यध् + श्यन् + ति → विध्यति । **ग्रहि ज्या वयि व्यधि वष्टि विचति वृश्चति पृच्छति भृज्जतीनां ङिति च** (६.१.१६) ।

अन्यानि कित्–ङित्–निमित्तकानि कार्याणि यथासङ्गं वक्ष्यन्ते ।

सम्प्रति धातूनाम् आयोजनशैली एकवारं स्मारणीया । एकैकस्मिन् पाठे अनया शैल्या धातूनां चिन्तनं प्रवर्तिष्यते ।

धातवः चतुर्दशविधाः

एकवारम् धातूनां आयोजन–पद्धतिः का, किमर्थं च इति स्मरणीया ।

वयं जानीमः यत् पाणिनेः सूत्राणि आधारीकृत्य प्रातिपदिकानि तदन्तपदम् अनुसृत्य आयोजितानि—पुंसि अकारान्तशब्दाः, देव इव; इकारान्तशब्दाः, मुनि इव; उकारान्तशब्दाः, गुरु इव; ऋकारान्तशब्दाः, कर्तृ इव । स्त्रियां लता, नदी, मति, धेनु, मातृ; क्लीबे वन, मधु, वारि अपि तथा । नाम देवशब्दः बहूनां शब्दानां प्रतिनिधिः, अतः देवशब्दं जानीमश्चेत्, बहून् शब्दान् जानीमः एव । अपि च प्रक्रियादृष्ट्या, सिद्धान्तकौमुद्यां प्रातिपदिकानां कृते तादृशी व्यवस्था अस्ति एव । रामशब्दस्य व्युत्पत्तिः प्रदर्शिता; इयं च व्युत्पत्तिः सर्वेषाम् अकारान्त–पुंलिङ्गशब्दानां कृते प्रतिनिधिः । तथैव अग्रेऽपि सर्वेषां प्रातिपदिकानां कृते ।

परन्तु यद्यपि धातूनां कृते अपि पाणिनीयसूत्राणि तथैव व्यवस्थापितानि, तथापि एतावता केनापि तादृशम् आयोजनं न कृतम् । न सिद्धान्तकौमुद्यां, न वा अन्यत्र । अधुनैव प्रथमवारम् ऐतिहासिकी पद्धतिः अक्रियत मात्रा दीक्षितपुष्पया । तया सर्वे द्विसहस्रं धातवः चतुर्दशसु भागेषु विभक्ताः— नव अजन्तधातूनां श्रेण्यः, पञ्च च हलन्तधातूनां श्रेण्यः । अजन्तधातवः अन्त्यक्रमेण आयोजिताः; हलन्तधातवः उपधा–क्रमेण विभक्ताः । किमर्थं तथा ? पाणिनेः सूत्राणि तथा सन्ति । अजन्तधातूनां कृते सूत्राणां कार्यम् अन्तिमस्वरम् अनुसृत्य भवति । अतः मात्रा एवमेव रीत्या अजन्तधातवः विभक्ताः—अकारान्ताः, आकारान्ताः, इकारान्ताः, ईकारान्ताः, उकारान्ताः, ऊकारान्ताः, ऋकारान्ताः, ॠकारान्ताः, एजन्ताः च । हलन्तधातूनां कृते पाणिनेः सूत्राणां कार्यं उपधाम् अनुसृत्य भवति । नाम अन्तिमवर्णात् प्राक् यः वर्णः, तम् अनुसृत्य इति । अतः तत्र हलन्तधातूनां कृते अदुपधाः, इदुपधाः, उदुपधाः, ऋदुपधाः, शेषधातवः चेति ।

अधुना दिवादिगणे सार्वधातुकलकाराणां रूपाणि कथं भवन्ति इति वीक्षताम् । दिवादिगणः प्रथमधातुगणसमूहे, नाम अस्मिन् गणे अङ्गं सर्वत्र अदन्तम् । श्यन्–प्रत्ययस्य शकारस्य इत्–संज्ञा **लशक्वतद्धिते** (१.३.८) इति सूत्रेण, नकारस्य इत्–संज्ञा **हलन्त्यम्** (१.३.३) इति सूत्रेण, **तस्य लोपः** (१.३.९) इत्यनेन तयोर्लोपः; य इत्यवशियिष्यते । दिवादिगणीयः धातुः यः कोऽपि भवतु नाम, अङ्गस्य अन्ते "य" इत्यस्य अकारः भवति एव । यथा नृत् + य → नृत्य ।

पूर्वमेव अस्माभिः सार्वधातुकलकारेषु (लट्, लोट्, लङ्, विधिलिङ् इत्येषु) तिङ्–प्रत्ययाः साधिताः । पूर्वतनेपाठे अदन्ताङ्ग–तिङ्प्रत्यययोः संयोजनं कथं भवति परस्मैपदे आत्मनेपदे च इति अवलोकितम् । अधुना दिवादिगणे यावन्तः धातवः सन्ति, तेषां सर्वेषां धातूनां कृते अङ्ग–निर्माण–विधिः अस्माभिः ज्ञायेत । अङ्गस्य सामान्य–चिन्तनं किं, विशेष–चिन्तनं किम् इति ज्ञेयम् । एकवारम् अङ्गं निर्मितं, ततः अग्रे चतुर्णां लकाराणां कृते अवशिष्टं सर्वं (सिद्धतिङ्प्रत्ययाः के, अपि च अङ्ग–तिङ्प्रत्यय–संयोजनविधिः) अस्माभिः ज्ञायते एव । अतः आहत्य, अधुना केवलम् अदन्तम् अङ्गम् अपेक्ष्यते; हस्ते अङ्गम् अस्ति चेत्, लटि, लोटि, लङि, विधिलिङि च तिङन्तबुद्धिः प्राप्ता ।

तर्हि अस्माकं कुञ्चिका अस्ति अङ्गम्; अङ्गं ज्ञायते चेत्, लटि, लोटि, लङि, विधिलिङि च सर्वाणि रूपाणि ज्ञायन्ते ।

एकवारं दिवादिगणे, चतुर्णां लकाराणां तिङन्तरूपाणि कथं सन्ति इति पश्येम । तदा एवमेव अग्रे कस्यचिदपि धातोः अदन्ताङ्गस्य ज्ञानेन, सर्वाणि तिङन्तरूपाणि ज्ञास्यन्ते । अत्र दृष्टान्ते परस्मैपदे नश्–धातुः, अङ्गम् अस्ति नश् + श्यन् → नश्य ।

लटि सिद्ध–प्रत्ययाः— लट्–लकारे तिङन्तरूपाणि—

| | | | | | |
|---|---|---|---|---|---|
| ति | तः | अन्ति | नश्यति | नश्यतः | नश्यन्ति |
| सि | थः | थ | नश्यसि | नश्यथः | नश्यथ |
| मि | वः | मः | नश्यामि | नश्यावः | नश्यामः |

लोटि सिद्ध–प्रत्ययाः—— / लोट्–लकारे तिङन्तरूपाणि——

| | | | | | |
|---|---|---|---|---|---|
| तु, तात् | ताम् | अन्तु | नश्यतु / नश्यतात् | नश्यताम् | नश्यन्तु |
| ०, तात् | तम् | त | नश्य/नश्यतात् | नश्यम् | नश्यत |
| आनि | आव | आम | नश्यानि | नश्याव | नश्याम |

लङि सिद्ध–प्रत्ययाः—— / लङ्–लकारे तिङन्तरूपाणि——

| | | | | | |
|---|---|---|---|---|---|
| त् | ताम् | अन् | अनश्यत् | अनश्यताम् | अनश्यन् |
| स् | तम् | त | अनश्यः | अनश्यतम् | अनश्यत |
| अम् | व | म | अनश्यम् | अनश्याव | अनश्याम |

विधिलिङि सिद्ध–प्रत्ययाः—— / विधिलिङ्–लकारे तिङन्तरूपाणि——

| | | | | | |
|---|---|---|---|---|---|
| इत् | इताम् | इयुः | नश्येत् | नश्येताम् | नश्येयुः |
| इः | इतम् | इत | नश्येः | नश्येतम् | नश्येत |
| इयम् | इव | इम | नश्येयम् | नश्येव | नश्येम |

दिवादिगणे, आत्मनेपदे विद्–धातुः, अङ्गम् अस्ति विद् + श्यन् → विद्य

लटि सिद्ध–प्रत्ययाः—— / लट्–लकारे तिङन्तरूपाणि——

| | | | | | |
|---|---|---|---|---|---|
| ते | इते | अन्ते | विद्यते | विद्येते | विद्यन्ते |
| से | इथे | ध्वे | विद्यसे | विद्येथे | विद्यध्वे |
| ए | वहे | महे | विद्ये | विद्यावहे | विद्यामहे |

लोटि सिद्ध–प्रत्ययाः—— / लोट्–लकारे तिङन्तरूपाणि——

| | | | | | |
|---|---|---|---|---|---|
| ताम् | इताम् | अन्ताम् | विद्यताम् | विद्येताम् | विद्यन्ताम् |
| स्व | इथाम् | ध्वम् | विद्यस्व | विद्येथाम् | विद्यध्वम् |
| ऐ | आवहै | आमहै | विद्यै | विद्यावहै | विद्यामहै |

लङि सिद्ध–प्रत्ययाः—— / लङ्–लकारे तिङन्तरूपाणि——

| | | | | | |
|---|---|---|---|---|---|
| त | इताम् | अन्त | अविद्यत | अविद्येताम् | अविद्यन्त |
| थाः | इथाम् | ध्वम् | अविद्यथाः | अविद्येथाम् | अविद्यध्वम् |
| इ | वहि | महि | अविद्ये | अविद्यावहि | अविद्यामहि |

विधिलिङि सिद्ध–प्रत्ययाः—— / विधिलिङ्–लकारे तिङन्तरूपाणि——

| | | | | | |
|---|---|---|---|---|---|
| ईत | ईयाताम् | ईरन् | विद्येत | विद्येयाताम् | विद्येरन् |
| ईथाः | ईयाथाम् | ईध्वम् | विद्येथाः | विद्येयाथाम् | विद्येध्वम् |
| ईय | ईवहि | ईमहि | विद्येय | विद्येवहि | विद्येमहि |

अग्रे केवलम् अङ्गं च लट्–लकारस्य प्रथमपुरुषैकवचनान्तरूपं दीयेते | ततः चतुर्णां लकारणां सर्वाणि रूपाणि ज्ञायन्ते |

**<u>दिवादिगणः</u> (140 धातवः)**

A. <u>सामान्यधातवः</u> (115 धातवः)

एषां धातूनां कृते किमपि कार्यं नास्ति | केवलं वर्णमेलनम् | इगन्तधातुः वा लघु–इगुपधधातुः वा चेत् **सार्वधातुकमपित्** (१.२.४), **क्क्ङिति च** (१.१.५) इत्याभ्यां गुणनिषेधः |

<u>आकारान्तधातवः</u> (1 धातुः)

माङ् माने (मापनार्थे) → मा → मा + श्यन् → माय इति अङ्गम् → माय + ते → लटि मायते

<u>ईकारान्तधातवः</u> (10 धातवः)

सर्वे आत्मनेपदिनः | गुणनिषेधत्वात् अत्रापि किमपि अङ्गकार्यं नास्ति | अपि च ई + य इत्यनयोः संयोजनेन सन्धिकार्यं नास्ति | अतः केवलं वर्णमेलनम्—

पीङ् पाने → पी + श्यन् → पी + य → पीय इति अङ्गम् → पीय + ते → पीयते (पिबति इत्यर्थः)
ईङ् गतौ → ई + श्यन् → ईय → ईयते (गच्छति इत्यर्थः)
प्रीङ् प्रीतौ → प्री + श्यन् → प्रीय → प्रीयते (प्रसन्नः भवति)
रीङ् स्रवणे → री + श्यन् → रीय → रीयते (जलं वहति)
व्रीङ् वृणोत्यर्थे → व्री + श्यन् → व्रीय → व्रीयते (आच्छादयति)
डीङ् विहायसा गतौ → डी + श्यन् → डीय → डीयते (पक्षी डीयते)
दीङ् क्षये → दी + श्यन् → दीय → दीयते (क्षीणः भवति, न्यूनीभवति)
धीङ् आधारे → धी + श्यन् → धीय → धीयते (धारणं करोति)
मीङ् हिंसायाम् → मी + श्यन् → मीय → मीयते (हिंसां कारोति)
लीङ् श्लेषणे → ली + श्यन् → लीय → लीयते (विलीनः भवति)

<u>ऊकारान्तधातवः</u> (2 धातू)
द्वावपि आत्मनेपदिनौ |

षूङ् प्राणिप्रसवे → सू + श्यन् → सू + य → सूय इति अङ्गम् → सूय + ते → सूयते (जनयति, प्रसूयते)
दूङ् परितापे → दूय → दूयते (दुःखी भवति)

<u>अदुपधधातवः</u> (19 धातवः)

णश अदर्शने → नश् + श्यन् → नश् + य → नश्य इति अङ्गम् → नश्य + ति → नश्यति
शक विभाषितो–मर्षणे → शक् + श्यन् → शक्य इति अङ्गम् → शक्य + ति/ते → शक्यति/ते (शक्नोति)
अण प्राणने → अण् + श्यन् → अण् + य → अण्य + ते → अण्यते (जीवितः तिष्ठति)
पद गतौ → पद् + श्यन् → पद् + य → पद्य → पद्य + ते → पद्यते (गच्छति, भवति, घटितो भवति)

रध् → रध्य → रध्यति, मन् → मन्य → मन्यते, तप् → तप्य → तप्यति, शप् → शप्य → शप्यति, णभ → नभ् → नभ्य → नभ्यति, अस् → अस्य → अस्यति, जस् → जस्य → जस्यति, तस् → तस्य → तस्यति, दस् → दस्य → दस्यति, वस् → वस्य → वस्यति, मस् → मस्य → मस्यति, स्नस् → स्नस्य → स्नस्यति, नह् → नह्य → नह्यति

<u>इदुपधधातवः</u> (17 धातवः)

ष्विदा गात्रप्रक्षरणे (स्वेदस्य आगमनम्) → स्विद् + श्यन् → स्विद्य इति अङ्गम् → स्विद्य + ति → स्विद्यति
क्लिद् → क्लिद्य → क्लिद्यति
क्ष्विद् → क्ष्विद्य → क्ष्विद्यति
खिद दैन्ये → खिद् + श्यन् → खिद्य → खिद्य + ते → खिद्यते
विद सत्तायाम् → विद् + श्यन् → विद्य → विद्य + ते → विद्यते

षिधु संराद्धौ → सिध् + श्यन् → सिध्य इति अङ्गम् → सिध्य + ति → सिध्यति
डिप् → डिप्य → डिप्यति
क्षिप प्रेरणे (तुदादौ क्षिपति, चुरादौ क्षिपयति) → क्षिप् + श्यन् → क्षिप्य → क्षिप्य + ति → क्षिप्यति
तिम् → तिम्य → तिम्यति
स्तिम् → स्तिम्य → स्तिम्यति
क्लिश उपतापे (क्लेश–प्राप्तिः) → क्लिश् → क्लिश् + श्यन् → क्लिश्य इति अङ्गम् → क्लिश्य + ते → क्लिश्यते
लिश → लिश् → लिश्य → लिश्यते
क्लिष → क्लिष् → क्लिष्य → क्लिष्यति
इष गतौ → इष् → इष्य → इष्यति
रिष हिंसायाम् → रिष् → रिष्य → रिष्यति
बिस → बिस् → बिस्य → बिस्यति
ष्णिह प्रीतौ → स्निह् + श्यन् → स्निह्य इति अङ्गम् → स्निह्य + ति → स्निह्यति

<u>उदुपधधातवः</u> (38 धातवः)

बुध अवगमने → बुध् + श्यन् → बुध्य इति अङ्गम् → बुध्य + ते → बुध्यते
युध संप्रहारे → युध् + श्यन् → युध्य इति अङ्गम् → युध्य + ते → युध्यते
क्रुध क्रोधे → क्रुध् + श्यन् → क्रुध्य इति अङ्गम् → क्रुध्य + ति → क्रुध्यति
क्षुध बुभुक्षायाम् → क्षुध् + श्यन् → क्षुध्य इति अङ्गम् → क्षुध्य + ति → क्षुध्यति
शुध शौचे → शुध् + श्यन् → शुध्य इति अङ्गम् → शुध्य + ति → शुध्यति
कुप क्रोधे → कुप् + श्यन् → कुप्य इति अङ्गम् → कुप्य + ति → कुप्यति
पुष पुष्टौ → पुष् + श्यन् → पुष्य इति अङ्गम् → पुष्य + ति → पुष्यति
शुष शोषणे (शुष्कः भवति) → शुष् + श्यन् → शुष्य इति अङ्गम् → शुष्य + ति → शुष्यति
तुष प्रीतौ (सन्तुष्टः भवति) → तुष् + श्यन् → तुष्य इति अङ्गम् → तुष्य + ति → तुष्यति

<u>ऋदुपधधातवः</u> (13 धातवः)

सृज विसर्गे (त्यजति) → सृज् + श्यन् → सृज्य इति अङ्गम् → सृज्य + ते → सृज्यते
नृती गात्रविक्षेपे → नृत् + श्यन् → नृत्य इति अङ्गम् → नृत्य + ति → नृत्यति
तृप प्रीणने (तृप्तः भवति, प्रसन्नः भवति) → तृप् + श्यन् → तृप्य इति अङ्गम् → तृप्य + ति → तृप्यति
हृष तुष्टौ (हर्षः आयाति) → हृष् + श्यन् → हृष्य इति अङ्गम् → हृष्य + ति → हृष्यति
ऋधौ वृद्धौ (वर्धने) → ऋध् + श्यन् → ऋध्य इति अङ्गम् → ऋध्य + ति → ऋध्यति
कृश तनूकरणे (कृशः भवति) → कृश् + श्यन् → कृश्य इति अङ्गम् → कृश्य + ति → कृश्यति

तृष् → तृष्यति, गृध् → गृध्यति, दृप् → दृप्यति, भृश् → भृश्यति, वृश् → वृश्यति, मृष् → मृष्यति/ते

<u>शेषधातवः</u> (15 धातवः)

पुष्प विकसने → पुष्प् + श्यन् → पुष्प्य इति अङ्गम् → पुष्प्य + ति → पुष्प्यति
दीपी दीप्तौ (प्रकाशते) → दीप् + श्यन् → दीप्य इति अङ्गम् → दीप्य + ति → दीप्यति
पूरी आप्यायने (पूरणे) → पूर् + श्यन् → पूर्य इति अङ्गम् → पूर्य + ति → पूर्यति

व्रीड् → व्रीड्यति, राध् → राध्यति, स्तीम् → स्तीम्यति

B. <u>विशेषधातवः</u> (25 धातवः)

1. <u>अनिदित्–धातूनाम् उपधायां नकारलोपः</u> (2 धातू)

यस्य धातोः ह्रस्व–इकारस्य इत्–संज्ञा भवति, सः धातुः इदित् इति उच्यते | यः धातुः इदित्, नास्ति, सः अनिदित् इत्युच्यते | अनिदितां धातूनाम् उपधायाः नकारस्य लोपः भवति किति ङिति प्रत्यये परे | दिवादिगणे तादृशौ द्वौ धातू स्तः, रञ्ज रागे → रञ्ज्, भ्रंशु अधःपतने → भ्रंश् च | श्यन् ङिद्वत् अतः श्यनि परे अनयोः धात्वोः न–लोपो भवति |

धातुपाठे अनुस्वारः, वर्गीयव्यञ्जनानां पञ्चमसदस्याः च, इमे सर्वे मूले दन्त्य–नकारः एव इति बोध्यम् | तदा सन्धिकार्येण नकारस्य स्थाने अनुस्वारः, ततः अग्रे च यथासङ्गम् अनुस्वारस्य स्थाने अन्यानि वर्गीयव्यञ्जनानि आयान्ति |

अतः दिवादिगणे रञ्ज्–धातोः मूलरूपम् अस्ति वस्तुतः रन्ज्; भ्रंश्–धातोः मूलरूपम् अस्ति भ्रन्श् | यथा—

रन्ज् → **नश्चापदान्तस्य झलि** इत्यनेन झलि परे अपदान्तस्य नकारस्य स्थाने अनुस्वारादेशः → रंज् → **अनुस्वारस्य ययि परसवर्णः** इत्यनेन ययि परे अनुस्वारस्य स्थाने परसवर्णादेशः → रञ्ज् | अतः धातुः अस्ति रञ्ज्, परन्तु उपधायां नकारः अस्ति इति बोध्यम् |

रञ्ज् → **दिवादिभ्यः श्यन्** (३.१.६९) इत्यनेन दिवादौ श्यन् भवति कर्त्रर्थे सार्वधातुकप्रत्यये परे → रञ्ज् + श्यन् → **अनिदितां हल उपधाया क्ङिति** (६.४.२४) इत्यनेन ङिति प्रत्यये परे उपधायां स्थितस्य नकारस्य लोपः → रज् + य → रज्य इति अङ्गम् → रज्य + ति → रज्यति

अयं रञ्ज्–धातुः भ्वादौ अपि अस्ति | तत्र शप् इति विकरणं; शप् च न कित् न वा ङित् अतः **अनिदितां हल उपधाया क्ङिति** (६.४.२४) इति सूत्रेण नलोपः न भवति | परन्तु तत्रापि नलोपः इष्टः, अतः पानिणिना तदर्थं विशिष्टसूत्रं विरचितम्—

**रञ्जेश्च** (६.४.२६) = रञ्ज्–धातोः अपि नकारस्य लोपः भवति शपि परे | रञ्जेः षष्ठ्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **श्नान्नलोपः** (६.४.२३) इत्यस्मात् **नलोपः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **रञ्जेः च अङ्गस्य नलोपः शपि** |

भ्वादिगणे रजति/रजते इति रूपे भवतः |

भ्रन्श् → **नश्चापदान्तस्य झलि** इत्यनेन झलि परे अपदान्तस्य नकारस्य स्थाने अनुस्वारादेशः → भ्रंश् | शकारः ययि नास्ति, अतः परसवर्णादेशः न भवति | तर्हि धातुः भ्रंश्, परन्तु उपधायां नकारः अस्ति इति बोध्यम् |

भ्रंश् → **दिवादिभ्यः श्यन्** (३.१.६९) इत्यनेन दिवादौ श्यन् भवति कर्त्रर्थे सार्वधातुकप्रत्यये परे → भ्रंश् + श्यन् → **अनिदितां हल उपधाया क्ङिति** (६.४.२४) इत्यनेन ङिति प्रत्यये परे उपधायां स्थितस्य नकारस्य लोपः → भ्रश् + य → भ्रश्य इति अङ्गम् → भ्रश्य + ति → भ्रश्यति

अयं भ्रंश्–धातुः भ्वादौ अपि अस्ति | तत्र न–लोपः न भवति, भ्रंशते इति रूपम् |

**अनिदितां हल उपधाया क्ङिति** (६.४.२४) = येषां हलन्त–धातूनां ह्रस्व–इकारस्य इत्–संज्ञा नास्ति, तेषाम् उपधायां नकारः अस्ति चेत्, तस्य नकारस्य लोपः भवति किति ङिति प्रत्यये परे | इत् इत् अस्ति येषां ते इदितः, न इदितः, अनिदितः, बहुव्रीहिगर्भः नञ्तत्पुरुषसमासः, तेषाम् अनिदिताम् | क् च ङ् च तयोः इतरेतरद्वन्द्वः क्ङौ | क्ङौ इतौ यस्य सः क्ङित्, द्वन्द्वगर्भः बहुव्रीहिसमासः, तस्मिन् क्ङिति | अनिदितां षष्ठ्यन्तं, हलः षष्ठ्यन्तम्, उपधाया षष्ठ्यन्तं, क्ङिति सप्तम्यन्तम्, अनेकपदमिदं सूत्रम् | **श्नान्नलोपः** (६.४.२३) इत्यस्मात् **न**, **लोपः** इत्यनयोः अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अनिदितां हलः अङ्गस्य उपधायाः नः लोपः क्ङिति** |

अनुस्वारादेशः— **नश्चापदान्तस्य झलि** |

**नश्चापदान्तस्य झलि** (८.३.२४) = अपदान्तस्य नकारस्य मकारस्य च स्थाने अनुस्वारादेशो भवति झलि परे | झल्–प्रत्याहारे वर्गस्य प्रथमः, द्वितीयः, तृतीयः, चतुर्थः च वर्णाः अपि च श्, ष्, स्, ह् इति वर्णाः अन्तर्भूताः | पदस्य अन्तः पदान्तः, न पदान्तः अपदान्तः तस्य अपदान्तस्य | नः षष्ठ्यन्तं, च अव्ययपदम्, अपदान्तस्य षष्ठ्यन्तं, झलि सप्तम्यन्तं, अनेकपदमिदं सूत्रम् | **मोऽनुस्वारः** (८.३.२३)

इत्यस्मात् **मः** इत्यस्य अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम् — **अपदान्तस्य मः नः च अनुस्वारः झलि संहितायाम्** |

परसवर्णादेशः— **अनुस्वारस्य ययि परसवर्णः** |

**अनुस्वारस्य ययि परसवर्णः** (८.४.५८) = अनुस्वारस्य स्थाने परसवर्णादेशो भवति ययि परे | परस्य सवर्णः, परसवर्णः, षष्ठी तत्पुरुषः | अनुस्वारस्य षष्ठ्यन्तं, ययि सप्तम्यन्तं, परसवर्णः प्रथमान्तं, त्रिपदमिदं सूत्रम् | यय्–प्रत्याहारे श्, ष्, स्, ह् एतान् वर्जयित्वा सर्वे हल्–वर्णाः अन्तर्भूताः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् संहितायाम् इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अनुस्वारस्य ययि परसवर्णः संहितायाम्** |

**परसवर्णः** इत्युक्ते अनुस्वारात् परः यः वर्णः, तस्य सवर्णः | सवर्णः नाम अनुस्वारात् परः यः वर्णः तस्य वर्णस्य वर्गे ये स्थिताः ते | अनुस्वारस्य स्थाने तेषु परसवर्णेषु अन्यतमः आदिष्टः भवतु | परन्तु तेषु परसवर्णेषु अस्माभिः कः अपेक्षितः ? **स्थानेऽन्तरतमः** (१.१.५०) सूचयति यत् यस्य स्थाने आदेशो भवति तस्य अन्तरतमो नाम सदृश आदिष्टो भवतु | वर्गीयव्यञ्जनेषु अनुस्वारस्य सदृशः पञ्चमसदस्यः एव | अतः **स्थानेऽन्तरतमः** इत्यस्य साहाय्येन **अनुस्वारस्य ययि परसवर्णः** इत्यनेन अनुस्वारस्य स्थाने अग्रिमवर्णस्य वर्गीयपञ्चमादेशो भवति | यथा—अंग → अङ्ग, मंच → मञ्च, मंता → मन्ता |

धेयम्— श्, ष्, स्, ह् इति वर्णाः **यय्**–प्रत्याहारे न सन्ति इति कारणेन एषु परेषु अनुस्वारस्य परसवर्णादेशो नैव भवति | यथा—रंस्यते = रंस्यते, नंस्यति = नंस्यति, संगंस्यते = संगंस्यते |

**स्थानेऽन्तरतमः** (१.१.५०) = प्रसङ्गे (स्थानं, गुणं, प्रमाणम्, अर्थम् इत्येषु अन्यतमम् अनुसृत्य) तुल्यतम आदेशो भवतु | यत्र यत्र स्थानेन निर्णेतुं शक्येत तत्र तत्र स्थानमेव निर्णयस्य आधारः | स्थाने सप्तम्यन्तम्, अन्तरतमः प्रथमान्तं, द्विपदमिदं सूत्रम् | इदं सूत्रं परिभाषा–सूत्रम् | यत्र (१) आदेशः अपेक्षितः, अपि च (२) अनेकानां वर्णानां ग्रहणम् अस्ति, अपि च (३) तेषु कः वर्णः गृहीतः स्यात् इत्यर्थं कोऽपि नियमः नास्ति, तस्यां दशायां यत् सूत्रम् आगत्य नियमति तत् परिभाषा–सूत्रम् इत्युच्यते | अत्र **प्रसङ्गे** तुल्यतम आदेश इति उक्तम् | "प्रसङ्ग" इत्युक्ते यत्र प्राप्तिरस्ति | तुल्यता, समानता, सादृश्यम् इत्यस्य आधारेण आदेशस्य विधानं चेत्, तर्हि स्थानम्, अर्थं, गुणं, प्रमाणं वा अनुसृत्य तुल्यता परिशील्यताम् | सर्वप्रथमं स्थानं; स्थानं नोपलभ्यते चेत्, गुणः; गुणः नोपलभ्यते चेत् प्रमाणं, प्रमाणं नोपलभ्यते चेत् अर्थः इति निर्णयस्य आधारः | आधिक्येन स्थानम् अनुसृत्य एव आदेशो भवति; अपरेषां प्रसङ्गः विरलः |

(१) स्थानम्

मुखे स्थानस्य सादृश्यम् अनुसृत्य आदेशो निर्णीयते | यथा—

**अकः सवर्णे दीर्घः** (६.१.१०१) = अक्–वर्णात् सवर्णे अचि परे पूर्वपरयोः स्थाने दीर्घसंज्ञक–एकादेशः स्यात् | अनुवृत्ति–सहितसूत्रम्— **अकः सवर्णे अचि पूर्वपरयोः एकः दीर्घः संहितायाम्** |

दण्ड + अग्रम् → दण्डाग्रम् | अत्र द्वौ अपि अकारौ कण्ठ्यौ, नाम कण्ठे उत्पन्नौ | अतः तयोः स्थाने यः दीर्घादेशो भवति, सोऽपि कण्ठः भवेत् सम्भवति चेत् | तत्र दीर्घः आकारः कण्ठ्यः, अतः स एव आदेशो भवति |

* वर्णोद्भवस्थानकोष्ठकम्—

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| अ | इ | ऋ | लृ | उ | ञ | ए | ओ | | ᳵक | |
| क | च | ट | त | प | म | ऐ | औ | व | ᳵख | |
| ख | छ | ठ | थ | फ | ङ | | | | | |
| ग | ज | ड | द | ब | ण | | | | | |
| घ | झ | ढ | ध | भ | न | | | | | वर्णाः |
| ङ | ञ | ण | न | म | ं | | | | | |
| ह | य | र | ल | ᳶप | | | | | | |
| : | श | ष | स | ᳶफ | | | | | | |
| कण्ठः | तालु | मूर्धा | दन्ताः | ओष्ठौ | नासिका | कं.ता. | कं.ओ. | दं.ओ. | जि.मू. | स्थानानि |

(२) गुणः

'गुणः' इत्युक्ते ध्वनिः; व्याकराणदृष्ट्या तस्य प्रकाशो भवति प्रयत्नेन | तत्र द्वैविध्यम् अस्ति— आभ्यन्तरप्रयत्नः बाह्यप्रयत्नः च | कुत्रचित् आदेशस्य निर्धारणं न स्थानेन सम्भवति, न वा अर्थेन | तत्र कुत्रचित् प्रयत्नः निर्णायकः, यथा—

**चजोः कु घिण्ण्यतोः** (७.३.५२) = चकारस्य जकारस्य च स्थाने कवर्गादेशो भवति घिति ण्यति च |

पच् + घञ् → **चजोः कु घिण्ण्यतोः** (७.३.५२) → पाकः
त्यज् + घञ् → **चजोः कु घिण्ण्यतोः** (७.३.५२) → त्यागः

अत्र चकारः तालव्यः वर्णः | जकारः अपि तथा | कवर्गस्य वर्णाः सर्वे कण्ठ्याः | अतः स्थानस्य आधारेण निर्णयः न शक्यः | तदर्थं गुणः, नाम प्रयत्नः, द्रष्टव्यः | चकारस्य प्रयत्नः विवारः, श्वासः, अघोषः, अल्पप्राणः | कवर्गस्य पञ्चसु सदस्येषु ककारः एव तथा; अतः चकारस्य स्थाने ककारादेशः भवति | जकारस्य प्रयत्नः संवारः, नादः, घोषः, अल्पप्राणः | कवर्गस्य पञ्चसु सदस्येषु गकारः एव तथा; अतः जकारस्य स्थाने गकारादेशः भवति |

| आभ्यन्तर-प्रयत्नाः | स्पृष्टाः | | | ईषत्स्पृष्टाः | ईषद्विवृताः | | विवृताः | संवृताः |
|---|---|---|---|---|---|---|---|---|
| संज्ञाः | स्पर्शाः | | | अन्तःस्थाः | ऊष्माणः | | स्वराः | |
| वर्णाः | क ख<br>च छ<br>ट ठ<br>त थ<br>प फ | ग ङ<br>ज ञ<br>ड ण<br>द न<br>ब म | घ<br>झ<br>ढ<br>ध<br>भ | य<br>व<br>र<br>ल | श<br>ष<br>स | ह | अ इ उ<br>ऋ लृ ए<br>ओ ऐ औ | ह्रस्वोऽकारः प्रयोगे |
| बाह्यप्रयत्नाः | अ.प्रा.म.प्रा.<br>विवाराः<br>श्वासाः<br>अघोषाः | अल्पप्राणाः<br>संवाराः<br>नादाः<br>घोषाः | म.प्रा.<br>संवाराः<br>नादाः<br>घोषाः | अ.प्रा.<br>संवाराः<br>नादाः<br>घोषाः | म.प्रा.<br>विवाराः<br>श्वासाः<br>अघोषाः | म.<br>सं.<br>ना.<br>घो. | उदात्तानुदात्तस्वरिताः | |

(३) प्रमाणम्

प्रमाणाम् इत्युक्ते दैर्घ्यम् | प्रमाण–शब्दे 'मानम्' अन्तर्भूतं वर्तते किल, तदर्थं तादृशः अर्थः स्वीकृतः | मानं नाम मापनम् | कुत्रचित् प्रमाणेन एव निर्धारणप्राप्तिः भवति, यथा—

**अदसोऽसेर्दादु दो मः** (८.२.८०) = यस्य अन्ते सकारो नास्ति, एतादृशस्य अदस्–शब्दस्य दकारोत्तरवर्णस्य स्थाने उकारादेशः ऊकारादेशः च; दकारस्य च स्थाने मकारादेशो भवति |

अम + स्मै → अम् + अस्मै → अम् + उष्मै → अमुष्मै
अम + भ्याम् → अम् + आभ्याम् → अम् + ऊभ्याम् → अमूभ्याम्

अत्र ह्रस्व–अकारस्य स्थाने ह्रस्व–उकारः; दीर्घ–आकारस्य स्थाने दीर्घ–ऊकारः | एतादृशतले स्थानेन, अर्थेन, गुणेन च निर्धारणं न भवति, अतः प्रमाणं निर्णायकः |

(४) अर्थः

कुत्रचित् उच्चारणस्थान–सादृश्येन आदेशस्य निर्णयो न शक्यते | यदा स्थानेन न सम्भवति, तदा अर्थः, गुणः, प्रमाणं च एषु त्रिषु अन्यतमः निर्णयस्य आधारः भवति | अर्थस्य प्रसङ्गे यथा—

**पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु** (६.१.६२) = पद्, दत्, नस्, मास्, हृत्, निश्, आसन्, यूषन्, दोषन्, यकन्, शकन्, उदन्, आसन् इत्येते आदेशाः विकल्पेन भवन्ति शस् प्रभृतिप्रत्ययेषु परेषु |

अनेन सूत्रेण द्वितीयविभक्तेः बहुवचनात् [शस्] आरभ्य सप्तमीविभक्तेः बहुवचनं [सुप्] यावत् एते आदेशाः विकल्पेन भवन्ति |

सु औ जस्

अम्   औट्   शस्
टा   भ्याम्   भिस्
ङे   भ्याम्   भ्यस्
ङसि   भ्याम्   भ्यस्
ङस्   ओस्   आम्
ङि   ओस्   सुप्

किन्तु केषां पदानां स्थाने भवन्ति इति नोक्तम् | अत्र **स्थानेऽन्तरतमः** (१.१.५०) इति सूत्रेण तदा आदेशः योग्यः भवति यदा स्थानिनः अर्थं प्रकटयितुं प्रभवति | अनेन एते उक्ताः आदेशाः क्रमेण एषाम् एव स्थानिनः भवन्ति— पाद, दन्त, नासिका, मास, हृदय, निशा, असृज्, यूष, दोष, यकृत्, शकृत्, उदक, आसन इति | यथा पद् चरणार्थे भवति, अतः स्थानिनोऽपि तादृशार्थः भवेत्; तस्मात् पाद इति स्थानी | एवमेव अग्रे सर्वत्र |

तदर्थं पाद-शब्दस्य रूपाणि एवं भवन्ति—

| | | |
|---|---|---|
| पादः | पादौ | पादाः |
| पादम् | पादौ | पदः, पादान् |
| पदा, पादेन | पद्भ्याम्, पादाभ्याम् | पद्भिः, पादैः |
| पदे, पादाय | पद्भ्याम्, पादाभ्याम् | पद्भ्यः, पादेभ्यः |
| पदः, पादात् | पद्भ्याम्, पादाभ्याम् | पद्भ्यः, पादेभ्यः |
| पदः, पादस्य | पदोः, पादयोः | पदाम्, पादानाम् |
| पदि, पादे | पदोः, पादयोः | पत्सु, पादेषु |

एवमेव अग्रेऽपि | दन्त-शब्दस्य विकल्पेन शस् इत्यस्मात् आरभ्य दत्-शब्दः इत्यादिकम् |

एषु स्थलेषु मुखे स्थानं किम् इत्यनेन निर्णयः न भवितुम् अर्हति स्म | तस्मात् अर्थः इति आधारः अपेक्षितः |

<u>सारांशः</u>

तर्हि आहत्य **स्थानेऽन्तरतमः** (१.१.५०) इति सूत्रेण सादृश्यम् उपस्थाप्यते चतुर्भिः माध्यमैः— स्थानं, गुणः, प्रमाणम्, अर्थः च | किन्तु एषु चतुर्षु प्रमुखम् अस्ति स्थानम् | कथं ज्ञायते ? काशिकाकारः वदति यत् पूर्वसूत्रात् **षष्ठी स्थानेयोगा** (१.१.४९) इत्यस्मात् 'स्थाने' इत्यस्य अनुवर्तनं भवितुम् अर्हति स्म; तस्मिन् एव लाघवम् आसीत् | तर्हि किमर्थं पाणिनिना तस्य अनुवर्तनं न स्वीकृतम् ? पुनः 'स्थाने' विलिख्य ददाति **स्थानेऽन्तरतमः** (१.१.५०) इति सूत्रे, चतुर्षु स्थानस्य प्राधान्यदर्शनार्थम् | अतः यत्र यत्र स्थानेन निर्धारणम् शक्यं, तत्र तत्र स्थानेन एव कर्तव्यम् | यत्र च न सम्भवति, तत्र अन्येषु त्रिषु—गुणः, प्रमाणम्, अर्थः इत्येषु—अन्यतमेन सादृश्यं साधनीयम् |

<u>इदितां धातूनां न्-लोपो न भवति</u>

यथा वदिँ इति इदित् धातुः | **इदितो नुम् धातोः** (७.१.५८) इत्यनेन नुमागमः, वन्द् इति धातुः | अस्य न्-लोपः न भवति |

वदिँ → वद् → वन्द् → वंद् → वन्द्

वदिँ → वद्   **उपदेशेऽजनुनासिक इत्**
वद् → वन्द्   **इदितो नुम् धातोः**
वन्द् → वंद्   **नश्चापदान्तस्य झलि**
वंद् → वन्द्   **अनुस्वारस्य ययि परसवर्णः**

लाछिँ → लाछ् → लान्छ् → लांछ् → लाञ्छ्
कपिँ → कप् → कन्प् → कंप् → कम्प्

लबिँ → लब् → लन्ब् → लंब् → लम्ब्

**इदितो नुम् धातोः** (७.१.५८) = इदितः धातोः नुम् आगमो भवति | इदित् इत्युक्ते इत् इत् यस्य सः | तत्र प्रथमः इत् नाम ह्रस्वः इकारः | द्वितीयः इत् नाम इत्–संज्ञा | ह्रस्व इकारस्य इत्–संज्ञा यस्य, सः धातुः इदित् | इत् इत् यस्य स इदित्, तस्य इदितः, बहुव्रीहिः | इदितः षष्ठ्यन्तं, नुम् प्रथमान्तं, धातोः षष्ठ्यन्तं, त्रिपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णम्— **इदितो धातोः नुम्** |

प्रश्नः उदेति–– यदि वदिँ–धातौ नकारादेशः भवति एव, तर्हि किमर्थं वन्द् मूलधातुः न स्यात् ? तथैव यदि लबि मकारः आयाति एव, तर्हि किमर्थं लम्ब् इत्येव मूलधातुः न स्यात् ? उत्तरम् अस्ति यत् तत्र कतिचन कार्याणि सन्ति | यथा **अनिदितां हल उपधाया क्ङिति** (६.४.२४) इत्यनेन यः धातुः इदित् नास्ति, तस्य धातोः उपधायां स्थितस्य नकारस्य लोपः स्यात् किति ङिति परे | परन्तु इदित् चेत् अस्माभिः यः नकारः आनीतः, तस्य नकारस्य लोपः कस्यामपि दशायां न भवति | साक्षत् आरम्भतः नकारः अस्ति चेत्, तस्य लोपः किति ङिति च भवति | यथा बन्ध–धातौ नकारः उपस्थितः मूलधातौ, अतः किति ङिति परे नकारलोपः | ल्युटि "बन्धनं" (नकारः उपस्थितः यतोहि ल्युट् प्रत्ययः कित् अपि नास्ति, ङित् अपि नास्ति); परन्तु क्तान्तरूपं "बद्ध" (नकारलोपः यतोहि क्त प्रत्ययः कित् अस्ति) | लबि धातोः **इदितो नुम् धातोः** इत्यनेन नुम् आगमः → लम्ब् | अस्य नकारस्य लोपः किति ङिति न भवति— यथा क्तान्तरूपं लम्बितः |

2. <u>सम्प्रसारणिनः धातवः</u> (1 धातुः)

सम्प्रसारण–संज्ञा भवति यत्र यणः स्थाने इक्–आदेशः भवति | धातौ एतादृशं कार्यं भवति चेत्, सः धातुः सम्प्रसारणी | दिवादिगणे एकः सम्प्रसारणी धातुः अस्ति— व्यध ताडने | अधस्तनेन सूत्रेण (**ग्रहि ज्या** इत्यनेन) किति ङिति प्रत्यये परे, सम्प्रसारणं भवति— नाम यणः स्थाने इक् |

सम्प्रसारणम्—
य् → इ
व् → उ
र् → ऋ
ल् → ऌ

व्यध्–धातौ तादृशौ द्वौ वर्णौ स्तः— वकारः यकारश्च | अत्र **न सम्प्रसारणे सम्प्रसारणम्** (६.१.३७) इति सूत्रेण परस्य एव सम्प्रासणं भवति, न तु पूर्वस्य | अतः व्यध्–धातौ यकारस्य सम्प्रसारणम् |

व्यध ताडने → व्यध् + श्यन् → **न सम्प्रसारणे सम्प्रसारणम्** इति सूत्रेण सम्प्रसारणे परे पूर्वं स्थितस्य वकारस्य सम्प्रसारणं न भवति → **ग्रहि ज्या** इति सूत्रेण सम्प्रसारण–आदेशः → व्–इ–अ–ध् + य → **सम्प्रसारणाच्च** (६.१.१०८) इति सूत्रेण सम्प्रसारण–संज्ञक–वर्णात् परं अच् अस्ति चेत्, पूर्वपरयोः स्थाने एकः पूर्वरूपादेशः → विध् + य → विध्य इति अङ्गम् → विध्य + ति → विध्यति

व्यध्–धातोः एव व्याधः यः मृगयां करोति | छिद्रं करोति इति विध्यति |

**ग्रहि ज्या वयि व्यधि वष्टि विचति वृश्चति पृच्छति भृज्जतीनां ङिति च** (६.१.१६) = ग्रह्, ज्या, वय्, व्यध्, वश्, व्यच्, व्रश्च्, प्रच्छ्, भ्रस्ज्, एषां सम्प्रसारणं भवति किति ङिति प्रत्यये परे | इतरेतरद्वन्द्वः, षष्ठीविभक्तौ | ग्रहि–ज्या–वयि–व्यधि–वष्टि–विचति–वृश्चति–पृच्छति–भृज्जतीनां षष्ठ्यन्तं, ङिति सप्तम्यन्तं, च अव्ययं, त्रिपदमिदं सूत्रम् | **वचिस्वपियजादीनां किति** (६.१.१५) इत्यस्मात् **किति** इत्यस्य अनुवृत्तिः; **ष्यङः सम्प्रसारणम् पुत्रपत्योस्तत्पुरुषे** (६.१.१३) इत्यस्मात् **सम्प्रसारणम्** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **ग्रहि ज्या वयि व्यधि वष्टि विचति वृश्चति पृच्छति भृज्जतीनां ङिति किति च सम्प्रसारणम्** |

| | क्त प्रत्यये परे (किति इत्यस्य उदाहरणम्) |
|---|---|
| ग्रह् (क्र्यादौ) → गृह्णाति | गृहीतः |
| ज्या (क्र्यादौ) → जिनाति [वृद्धः, जीर्णः भवति] | जीनः |
| वय् (वे भ्वादौ) → वयति/ते [to weave, braid, sew] | उतः |
| व्यध् (दिवादौ) → विध्यति [छिनत्ति] | विद्धः |

वश् (अदादौ) → वष्टि [इच्छति] उशितः
व्यच् (तुदादौ) → विचति [वञ्चयति] विचितः
व्रश्च् (तुदादौ) → वृश्चति [कर्तयति] वृक्णः
प्रच्छ् (तुदादौ) → पृच्छति पृष्टः
भ्रस्ज् (तुदादौ) → भृज्जति [to fry, parch, roast] भृष्टः

**इग्यणः सम्प्रसारणम्** (१.१.४५) = यणः स्थाने यः इक्–प्रत्याहारे स्थितवर्णः आदिष्टः, तस्य सम्प्रसारण–संज्ञा भवति | इक् प्रथमान्तं, यणः षष्ठ्यन्तं, सम्प्रसारणम् प्रथमान्तं, त्रिपदमिदं सूत्रम् | सूत्रं सम्पूर्णम्— **यणः इक् सम्प्रसारणम्** |

**सम्प्रसारणाच्च** (६.१.१०८) = सम्प्रसारण–संज्ञक–वर्णात् परम् अच् अस्ति चेत्, पूर्वपरयोः स्थाने एकः पूर्वरूपादेशो भवति | सम्प्रसारणात् पञ्चम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **इको यणचि** (६.१.७७) इत्यस्मात् **अचि**, **अमि पूर्वः** (६.१.१०७) इत्यस्मात् **पूर्वः** इत्यनयोः अनुवृत्तिः भवतः | **एकः पूर्वपरयोः** (६.१.८४), **संहितायाम्** (६.१.७१) इत्यनयोः अधिकारः | अनुवृत्ति–सहित–सूत्रम् — **सम्प्रसारणात् च अचि पूर्वपरयोः एकः पूर्वः संहितायाम्** |

**न सम्प्रसारणे सम्प्रसारणम्** (६.१.३७) = सम्प्रसारणे परे पूर्वं स्थितस्य सम्प्रसारणं न भवति | न अव्ययपदं, सम्प्रसारणे सप्तम्यन्तं, सम्प्रसारणं प्रथमान्तं, त्रिपदमिदं सूत्रम् | सूत्रं सम्पूर्णम्— **न सम्प्रसारणे सम्प्रसारणम्** |

3. <u>ॠकारान्ताः धातवः</u> (2 धातू)

दिवादिगणे जॄष्, झॄष् वयोहानौ (जीर्णः भवति) इमौ द्वौ धातू ॠकारान्तौ, समानार्थकौ च | **हलन्त्यम्, तस्य लोपः** इत्याभ्यां जॄ, झॄ |

जॄ + श्यन् → जॄ + य → **ॠत इद् धातोः** (७.१.१००) इत्यनेन ॠदन्तस्य धातोः ह्रस्व–इकारादेशः → जि + य → **उरण् रपरः** (१.१.५१) इत्यनेन ऋकारस्य स्थाने यदा अण्–आदेशः भवति, तदा सः अण् सदा रपरः → जिर् + य → य हलादिः अतः **हलि च** (८.२.७७) इत्यनेन हलि परे रेफान्तस्य धातोः उपधायां स्थितः इक्–वर्णः दीर्घः → जीर् + य → जीर्य इति अङ्गम् → जीर्य + ति → जीर्यति

जॄष् + श्यन् अनुबन्धलोपे
जॄ + य **ॠत इद् धातोः** (७.१.१००)
जि + य **उरण् रपरः** (१.१.५१)
जिर् + य **हलि च** (८.२.७७)
जीर् + य वर्णमेलने
जीर्य + ति → लटि जीर्यति

झॄ + श्यन् → **ॠत इद् धातोः** → झि + य → **उरण् रपरः** → झिर् + य → **हलि च** → झीर् + य → झीर्य इति अङ्गम् → झीर्य + ति → झीर्यति

**ॠत इद् धातोः** (७.१.१००) = ॠदन्तस्य धातोः अङ्गस्य ह्रस्व–इकारादेशो भवति (किति ङिति प्रत्यये परे) | अस्मिन् सूत्रे निमित्तं नोक्तं; यत्र यत्र अवसरः तत्र तत्र प्राप्तिः; कित्–ङित् भिन्नप्रत्ययः परश्चेत्, गुणे सति इकारादेशस्य प्रसक्तिर्न भवति | **अलोऽन्त्यस्य** (१.१.५२) इत्यस्य साहाय्येन पूर्णतया धातोः स्थाने न, अपि तु अन्तिमस्य ॠकारस्य स्थाने ह्रस्व–इकारादेशः | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यस्य साहाय्येन **ॠतः** इत्यनेन ॠदन्तस्य इत्यस्यापि ग्रहणम् | ॠतः षष्ठ्यन्तम्, इत् प्रथमान्तम्, धातोः षष्ठ्यन्तम्, त्रिपदमिदं सूत्रम् | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **ॠतः धातोः अङ्गस्य इत्** |

**षष्ठी स्थानेयोगा** (१.१.४९) = षष्ठीविभक्तेः अन्यार्थाभावे 'स्थाने' इत्यर्थो भवति | स्थानेन योगो यस्याः, बहुव्रीहिः | परिभाषासूत्रम् |

**अलोऽन्त्यस्य** (१.१.५२) = षष्ठीविभक्ति–द्वारा यस्य पदस्य स्थाने आदेशः प्राप्तः, सः आदेशः अन्त्यस्य अल्–वर्णस्य स्थाने भवति | परिभाषासूत्रम् | अलः षष्ठ्यन्तम्, अन्त्यस्य षष्ठ्यन्तम्, द्विपदमिदं सूत्रम् | **षष्ठी स्थानेयोगा** (१.१.४९) इत्यस्मात् **षष्ठी**, **स्थाने** इत्यनयोः अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **षष्ठ्या अन्त्यस्य अलः स्थाने** (विद्यमानः आदेशः) |

**येन विधिस्तदन्तस्य** (१.१.७२) = विशेषणं तदन्तस्य अपि भवति, स्वस्यापि भवति | सोऽन्ते यस्य स तदन्तः, तस्य तदन्तस्य बहुव्रीहिः | परिभाषासूत्रम् | विधीयते इति विधिः | येन तृतीयान्तम्, विधिः प्रथमान्तम्, तदन्तस्य षष्ठ्यन्तम्, त्रिपदमिदं सूत्रम् | **स्वं रूपं शब्दस्याऽशब्दसंज्ञा** (१.१.६८) इत्यस्मात् **स्वम्, रूपम्** इत्यनयोः अनुवृत्तिः | विभक्तिपरिणामः इत्यनेन षष्ठ्यन्ते भवतः, **स्वस्य रूपस्य** | अनुवृत्ति-सहितसूत्रम्— **येन विधिः तदन्तस्य स्वस्य रूपस्य** (च) |

**उरण् रपरः** (१.१.५१) = ऋकारस्य स्थाने यदा अण्-आदेशः भवति, तदा सः अण् सदा रपरः भवति | ऋकारेण त्रिंशत्-प्रकारकः ऋकारः भवति इति बोध्यम् | रः परो यस्य सः रपरः | उः षष्ठ्यन्तम्, अण् प्रथमान्तम्, रपरः प्रथमान्तम्, त्रिपदमिदं सूत्रम् | **स्थानेऽन्तरतमः** (१.१.५०) इत्यस्मात् **स्थाने** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **उः स्थाने अण् रपरः** |

**हलि च** (८.२.७७) = रेफान्तानां वकारान्तानां च धातूनाम् उपधायां स्थितः इक्-वर्णः दीर्घो भवति हलि परे | हलि सप्तम्यन्तम्, च अव्ययपदम्, द्विपदमिदं सूत्रम् | **सिपि धातो रुर्वा** (८.२.७४) इत्यस्मात् **धातोः** इत्यस्य अनुवृत्तिः; **र्वोरुपधाया दीर्घ इकः** (८.२.७६) इत्यस्य पूर्णतया अनुवृत्तिः | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यस्य साहाय्येन तदन्तविधिः अतः **र्वोः** इत्यनेन येषाम् धातूनाम् अन्ते रेफः वकारश्च, तेषामपि ग्रहणम् | अनुवृत्ति-सहितसूत्रम्— **हलि च र्वोः धातोः उपधायाः इकः दीर्घः** |

4. <u>वकारान्तानां इकः दीर्घत्वम्</u> (4 धातवः)

दिवादिगणे चत्वारः वकारान्तधातवः सन्ति— दिवुँ (दिव्), षिवुँ (सिव्), स्रिवुँ (स्रिव्), ष्ठिवुँ (ष्ठिव्) |

दिवुँ क्रीडा-विजिगीषा-व्यवहार-द्युति-स्तुति-मोदमद-स्वप्न-कान्ति-गतिषु (स्वीकरोति, क्रीडति, इच्छति, जेतुम् इच्छति, निद्राति, गच्छति, तेजस्वी भवति, प्रशंसां करोति, प्रसन्नो भवति, व्यवहारं करोति)<br>
षिवुँ तन्तुसन्ताने (सीवनं करोति [sew], रोपयति)<br>
स्रिवुँ गतिशोषणयोः (गच्छति, शुष्कः भवति)<br>
ष्ठिवुँ निरसने (to spit)

**हलि च** (८.२.७७) इत्यनेन यः धातुः वकारान्तः, तस्य उपधायां स्थितः इक्-वर्णः दीर्घो भवति हलि परे | श्यन् इति विकरणप्रत्ययः हलादिः (यकारादिः) च अपित् च, अतः सूत्रस्य प्रसक्तिरस्ति | यदि श्यन् पित् अभविष्यत्, तर्हि **पुगन्तलघूपधस्य च** (७.३.८६) इत्यनेन उपधायां लघु-इकः गुणः अभविष्यत् | गुणकार्याभावे, **हलि च** आगत्य कार्यं करोति |

दिव् + श्यन् → **हलि च** इत्यनेन वकारान्त-धातोः हलि परे, उपधायां स्थितः इक्-वर्णः दीर्घः → दीव् + य → दीव्य इति अङ्गम् → दीव्य + ति → दीव्यति<br>
सिव् + श्यन् → **हलि च,** इक्-वर्णः दीर्घः → सीव् + य → सीव्य → सीव्य + ति → सीव्यति<br>
स्रिव् + श्यन् → **हलि च,** इक्-वर्णः दीर्घः → स्रीव् + य → स्रीव्य → स्रीव्य + ति → स्रीव्यति<br>
ष्ठिव् + श्यन् → **हलि च,** इक्-वर्णः दीर्घः → ष्ठीव् + य → ष्ठीव्य → ष्ठीव्य + ति → ष्ठीव्यति

**सुब्धातुष्ठिवुष्वष्कतीनां सत्वप्रतिषेधो वक्तव्यः** इति वार्तिकं, **धात्वादेः षः सः** (६.१.६४) इत्यस्य निषेधकम् = नामधातूनां, ष्ठिवु, ष्वष्क अनयोः धात्वोः च षकारस्य स्थाने सकारादेशो न भवति | षोडीयते (नामधातुः) | षण्डीयते (नामधातुः) | ष्ठीवति | ष्वष्कते |

5. <u>गुणः</u> (1 धातुः)

ञिमिदाँ स्नेहने (स्निग्धः भवति, to melt, dissolve) → **आदिर्ञिटुडवः** (१.३.५), **उपदेशेऽजनुनासिक इत्** (१.३.२), **तस्य लोपः** (१.३.९) इत्येभिः अनुबन्धलोपे मिद् इति धातुः |

**मिदेर्गुणः** (७.३.८२) = मिद्-धातोः गुणः भवति शिति प्रत्यये परे | मिदेः षष्ठ्यन्तं, गुणः प्रथमान्तं, द्विपदमिदं सूत्रम् | श्यन्-प्रत्ययस्य अपित्त्वात् **क्ङिति च** (१.१.५) इत्यनेन गुण-निषेधः, किन्तु **मिदेर्गुणः** (७.३.८२) तस्य अपवादभूतसूत्रम्; अनेन गुणः भवति | **ष्ठिवुक्लमुचमां शिति** (७.३.७५) इत्यस्मात् **शिति** इत्यस्य अनुवृत्तिः | **इको गुणवृद्धी** (१.१.३) इत्यनेन परिभाषा-सूत्रेण **इकः** आयाति यत्र स्थानी नोक्तम् | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **मिदेः अङ्गस्य इकः गुणः शिति** |

मिद् + श्यन् → **मिदेर्गुणः** (७.३.८२) इत्यनेन शिति परे गुणः → मेद् + य → मेद्य इति अङ्गम् → मेद्य + ति → मेद्यति

6. <u>धात्वादेशः</u> (1 धातुः)

जनीँ प्रादुर्भावे (उत्पन्नो भवति, सञ्जातो भवति)

**ज्ञाजनोर्जा** (७.३.७९) = ज्ञा (क्र्यादिगणे), जन् (दिवादिगणे) चेत्यनयोः जा-आदेशो भवति शिति प्रत्यये परे | आदेशः अनेकाल् अतः **अनेकाल्शित् सर्वस्य** (१.१.५५) इत्यनेन आदेशः सर्वस्थानिनः स्थाने भवति (न तु अन्त्यवर्णस्य) | ज्ञाश्च जन् च तयोरितरेतरद्वन्द्वः ज्ञाजनौ, तयोः ज्ञाजनोः | ज्ञाजनोः षष्ठ्यन्तं, जा लुप्तप्रथमाकं पदं, द्विपदमिदं सूत्रम् | **ष्ठिवुक्लमुचमां शिति** (७.३.७५) इत्यस्मात् **शिति** इत्यस्य अनुवृतिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **ज्ञाजनोः अङ्गस्य जा शिति** |

**अनेकाल्शित् सर्वस्य** (१.१.५५) = आदेशः अनेकाल् (आदेशे एक एव वर्णः न अपि तु अनेके वर्णाः) अथवा शित् चेत्, सर्वस्थानिनः स्थाने भवति, न तु अन्त्यवर्णस्य | यस्य स्थाने आदेशः आदिष्टः, सः स्थानी | इदं सूत्रम् **अलोऽन्त्यस्य** (१.१.५२) इत्यस्य अपवादः | न एकः अनेकः नञ्तत्पुरुषः; अनेकः अल् यस्य सः अनेकाल् बहुव्रीहिः; शकारः इत् यस्य सः शित् बहुव्रीहिः; अनेकाल् च शित् च अनेकाल्शित् समाहारद्वन्द्वः | अनेकाल् प्रथमान्तं, शित् प्रथमान्तं, सर्वस्य षष्ठ्यन्तं, त्रिपदमिदं सूत्रम् | **स्थानेऽन्तरतमः** (१.१.५०) इत्यस्मात् **स्थाने** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **अनेकाल्शित् सर्वस्य स्थाने** |

जन्-धातुः आत्मनेपदी—

जनीँ → अनुबन्धलोपे जन् → जन् + श्यन् → **ज्ञाजनोर्जा** इत्यनेन शिति परे जा-आदेशः → जा + य → जाय इति अङ्गम् → जाय + ते → जायते

7. <u>ओकारान्तानाम् ओकारलोपः</u> (4 धातवः)

चत्वारः धातवः सन्ति— दो, शो, छो, षो | दो अवखण्डने (विभागे भग्नं करोति); शो तनूकरणे (तीक्ष्णं करोति, कृशं करोति); छो छेदने (कर्तयति); षो अन्तकर्मणि (पूरयति, समापयति) |

**ओतः श्यनि** ( ७.३.७१) इत्यनेन धात्वङ्गान्तस्य ओकारस्य लोपो भवति श्यनि परे |

दो + श्यन् → **ओतः श्यनि** इत्यनेन श्यनि परे धात्वङ्गान्तस्य ओकारस्य लोपः → द् + य → द्य इति अङ्गम् → द्य + ति → द्यति
शो + श्यन् → **ओतः श्यनि** इत्यनेन श्यनि परे धात्वङ्गान्तस्य ओकारस्य लोपः → श् + य → श्य इति अङ्गम् → श्य + ति → श्यति
छो + श्यन् → **ओतः श्यनि** इत्यनेन श्यनि परे धात्वङ्गान्तस्य ओकारस्य लोपः → छ् + य → छ्य इति अङ्गम् → छ्य + ति → छ्यति
षो → **धात्वादेः षः सः** (६.१.६४) इत्यनेन मूलधातोः आदौ षकारस्य स्थाने सकारादेशः → सो + श्यन् → **ओतः श्यनि** इत्यनेन श्यनि परे धात्वङ्गान्तस्य ओकारस्य लोपः → स् + य → स्य इति अङ्गम् → स्य + ति → स्यति

**ओतः श्यनि** ( ७.३.७१) = धात्वङ्गस्य ओकारस्य लोपो भवति श्यनि परे | **अलोऽन्त्यस्य** (१.१.५२) इति परिभाषा-सूत्रस्य साहाय्येन आदेशः अन्त्यस्य अल्-वर्णस्य स्थाने भवति— धात्वन्ते एव ओकारस्य लोपः | ओतः षष्ठ्यन्तम्, श्यनि सप्तम्यन्तम्, द्विपदमिदं सूत्रम् | **घोर्लोपो लेटि वा** (७.३.७०) इत्यस्मात् **लोपः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **श्यनि ओतः अङ्गस्य लोपः** |

8. <u>शमादि अन्तर्गणः</u> (8 धातवः)

**शमामष्टानां दीर्घः श्यनि** (७.३.७४) = शमादीनाम् अष्टानां धातूनां दीर्घत्वं श्यनि परे | दिवादिगणे कश्चन अन्तर्गणः अस्ति शमादिगणः नाम्ना, यस्मिन् अष्ट धातवः सन्ति | श्यनि परे एषां धातूनाम् उपधायां स्थितः अकारः दीर्घो भवति | **अचश्च** (१.२.२८) इत्यस्य साहाय्येन अचः एव दीर्घत्वम् | शमां षष्ठ्यन्तम्, अष्टानां षष्ठ्यन्तं, दीर्घः प्रथमान्तं, श्यनि सप्तम्यन्तम्, अनेकपदमिदं सूत्रम् | शमाम् इत्यस्य बहुवचनेन शमादिः इति अर्थग्रहणम् | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **शमाम् अष्टानाम् अङ्गानां अचः**

**दीर्घः श्यनि** |

**अचश्च** (१.२.२८) = यत्र यत्र ह्रस्वः, दीर्घः, प्लुतः च विधीयन्ते, तत्र तत्र **अचः** इति षष्ठ्यन्तं पदम् आगत्य उपस्थितं भवति | परिभाषासूत्रम् | अचः षष्ठ्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **ऊकालोऽज्झ्रस्वदीर्घप्लुतः** (१.२.२७) इत्यस्मात् **अच्, ह्रस्वदीर्घप्लुतः** इत्यनयोः अनुवृत्तिः | तत्र विभक्तिपरिणामेन तृतीयान्तं भवति, **ह्रस्वदीर्घप्लुतैः (शब्दैः)** | अनुवृत्ति-सहितसूत्रम्— **ह्रस्वदीर्घप्लुतैः अचः च अच्** |

**ऊकालोऽज्झ्रस्वदीर्घप्लुतः** (१.२.२७) इति संज्ञासूत्रम् | अनेन 'उ' इत्यस्य नाम ह्रस्वः, 'ऊ' इत्यस्य नाम दीर्घः, 'ऊ३' इत्यस्य नाम प्लुतः | ततः अग्रिमं सूत्रम् **अचश्च** (१.२.२८) वक्ति यत् यत्र यत्र एतैः शब्दैः आदेशः इष्टः, तत्र तत्र अचः स्थाने एव अयम् आदेशो भवति |

शमुँ उपशमे (शान्तः भवति) → शम् → शम् + श्यन् → **शमामष्टानां दीर्घः श्यनि** इत्यनेन दीर्घत्वम् → शाम् + य → शाम्य इति अङ्गम् → शाम्य + ति → शाम्यति
तमुँ काङ्क्षायाम् (इच्छति) → तम् → तम् + श्यन् → **शमामष्टानां दीर्घः श्यनि** इत्यनेन दीर्घत्वम् → ताम् + य → ताम्य इति अङ्गम् → ताम्य + ति → ताम्यति
दमुँ उपशमे (शान्तः भवति) → दम् → दम् + श्यन् → **शमामष्टानां दीर्घः श्यनि** इत्यनेन दीर्घत्वम् → दाम् + य → दाम्य इति अङ्गम् → दाम्य + ति → दाम्यति
श्रमुँ तपसि (श्रान्तः भवति) → श्रम् → श्रम् + श्यन् → **शमामष्टानां दीर्घः श्यनि** इत्यनेन दीर्घत्वम् → श्राम् + य → श्राम्य इति अङ्गम् → श्राम्य + ति → श्राम्यति
भ्रमुँ अनवस्थाने (भ्रमणं करोति) → भ्रम् → भ्रम् + श्यन् → **शमामष्टानां दीर्घः श्यनि** इत्यनेन दीर्घत्वम् → भ्राम् + य → भ्राम्य इति अङ्गम् → भ्राम्य + ति → भ्राम्यति
क्षमूँ सहने (क्षमां करोति) → क्षम् → क्षम् + श्यन् → **शमामष्टानां दीर्घः श्यनि** इत्यनेन दीर्घत्वम् → क्षाम् + य → क्षाम्य इति अङ्गम् → क्षाम्य + ति → क्षाम्यति
क्लमुँ ग्लानौ (ग्लानः भवति) → क्लम् → क्लम् + श्यन् → **शमामष्टानां दीर्घः श्यनि** इत्यनेन दीर्घत्वम् → क्लाम् + य → क्लाम्य इति अङ्गम् → क्लाम्य + ति → क्लाम्यति
मदीँ हर्षे (प्रसन्नः भवति) → मद् → मद् + श्यन् → **शमामष्टानां दीर्घः श्यनि** इत्यनेन दीर्घत्वम् → माद् + य → माद्य इति अङ्गम् → माद्य + ति → माद्यति

परिशिष्टम्

धातुपाठे, भ्वादिगणे दिवादिगणे च द्वौ धातू उभयत्र स्तः— ष्ठिवु, क्लमु च | उभयत्र च उपधायां स्थितस्य स्वरस्य दीर्घत्वं, किञ्च उभयत्र इदं दीर्घत्वं सिध्यति भिन्नसूत्राभ्यां यद्यपि भ्वादिगणे यत् विशिष्टं सूत्रम् उक्तं, **ष्ठिवुक्लमुचमां शिति** (७.३.७५), तस्य प्रसक्तिर्भवितुम् अर्हति स्म दिवादावपि श्यन्-प्रत्ययस्य शित्वात् | अस्माकं वर्गे द्वे छात्रे 'इदं किमर्थम्' इति पृष्टवत्यौ | मया यदा इमं प्रश्नं मातरः पृष्टाः, तदा ताभिः विचिन्त्य उक्ताः यत्—

वस्तुतः धातुपाठे अनेके दोषाः |

**वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः** (३.१.७०) = भ्राश्, भ्लाश्, भ्रमु चलने, क्रम्, क्लम्, त्रस्, त्रुट्, लष्, एतेभ्यः श्यन् विकल्पेन भवति, कर्त्रर्थके प्रत्यये परे |

अनेन सूत्रेण यदा भ्वादिगणे एव क्लमु-धातोः विकल्पेन श्यन् इति तु उक्तमेव, तदा दिवादिगणे तस्य धातोः पठनस्य न काऽपि आवश्यकता, न भवेदेव | भ्वादिगणे एव भवतु; दिवादिगणस्य **शमामष्टानां दीर्घः श्यनि** (७.३.७४) इति अन्तर्गणविधायकसूत्रात् अयं धातुः निष्कासनीयः | '**शमां सप्तानां दीर्घः श्यनि**' इति भवतु | भ्वादिगणे एव **ष्ठिवुक्लमुचमां शिति** (७.३.७५) इत्यनेन एव 'क्लामति', 'क्लाम्यति' द्वयोरपि दैर्घ्यं भवतु |

**ष्ठिवुक्लमुचमां शिति** (७.३.७५) = ष्ठिव्, क्लम्, चम् एषां धातुरूपि-अङ्गानाम् अचः दीर्घत्वं शिति प्रत्यये परे |

ततः अग्रे उक्तवत्यः, अन्यच्च ष्ठिवु-धातुः **ष्ठिवुक्लमुचमां शिति** (७.३.७५) इत्यनेन एव भ्वादावपि दिवादावपि दीर्घत्वं भवतु | **हलि च**

(८.२.७७) इत्यस्य दिवादौ छिवु कृते न काऽपि आवश्यकता, श्यन् इत्यस्य शित्त्वात् | अपि च तदपेक्षया पुनः इतोऽपि सम्यक्, छिवु–धातुः भ्वादिगणे एव भवतु; **वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः** (३.१.७०) इति सूत्रे छिवु–धातुं संयोजयतु | अनेन भ्वादौ एव छिवु–धातोः क्लमु इव विकल्पेन श्यन् | तस्मात् भ्वादावेव **छिवुक्लमुचमां शिति** (७.३.७५) इत्यनेन द्वयमपि 'ष्ठीवति', 'ष्ठीव्यति' इत्येव सम्यक् |

ततः अग्रे मातृभिः उक्तं, 'किन्तु मम पुस्तकम् अधुनैव मुद्रितम् | किमर्थम् इदं पूर्वमेव त्वया नोक्तम् ?' यदा मया पुनः उक्तं यत् अयं प्रश्नः द्वाभ्यां छात्राभ्यां पृष्टः, तदा ताः उक्तवत्यः, ते द्वे छात्रे अतीव बुद्धिमत्यौ !

इति दिवादिगणे समग्रं तिङ्–सम्बद्धं सार्वधातुकप्रकरण–चिन्तनं समाप्तम् |

Swarup – July 2015